यत् ।) प्रधानः । श्रेष्ठः । इत्यमरः ।३।१।५८। (यथा, रघुः । १० । ६४ ।

"ताभ्यस्तथाविधान् स्वप्नान् श्रुत्वा प्रीतो हि पार्थिवः ।
मेने पराद्ध्यमात्मानं गुरुत्वेन जगद्गुरोः ॥")

परावर्तं, क्ली, (परावततीति । परा+अव+बाहुलकात् अतच् ।) परूषकम् । इति राजनिर्घण्टः ॥

परावर्त्तः, पुं, (परा वर्त्त्यते इति । परा+वृत्+अप् ।) परिवर्त्तः । विनिमयः । इति हेमचन्द्रः ॥

परावहः, पुं, (परा वहतीति । वह्+अच् ।) सप्तवायन्तर्गतसप्तमवायुः । स तु परिवहवायोरूर्द्ध्वस्थितः । इति सिद्धान्तशिरोमणिः ॥ (यथा, हरिवंशे २३६ अध्याये ।

"आवहः प्रवहश्चैव विवहश्च समीरणः ।
परावहः संवहश्च उद्वहश्च महाबलः ॥")

पराविद्धः, पुं, (परा+व्यध+क्तः ।) कुवेरः । इति शब्दमाला ॥

परावेदी, स्त्री, (परमुत्कर्षमाविन्दतीति । विद्+अण् । स्त्रियां ङीप् ।) बृहती । इति केचित् ॥

पराशरः, पुं, (अस्य निरुक्तिरुक्ता यथा, महाभारते । १ । १७६ । ३ ।

"परासुः स यतस्तेन वशिष्ठः स्थापितो मुनिः ।
गर्भस्थेन ततो लोके पराशर इति स्मृतः ॥"

"परासोराशासनमवस्थानं येन स पराशरः । आङ्पूर्व्वाच्छासतेर्डरन् ।" इति नीलकण्ठः ॥) व्यासपिता । शक्तिमुनिपुत्त्रः । यथा,—

"सुतं त्वजनयच्छक्तेरदृश्यन्ती पराशरम् ।
काली पराशरात् जज्ञे कृष्णद्वैपायनं मुनिम् ॥"
इत्यग्निपुराणम् ॥

(अयं हि द्वादशाध्यायात्मिकां धर्म्मसंहितां कृतवान् । सा च कलिकर्त्तव्यधर्म्मविषया । यदुक्तं तत्रैव ।

"कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः ।
द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ॥"

तत्र संहितायां १मे अध्याये युगभेदे धर्म्मभेदादिकथनम् । २यः आचारधर्म्मगृहधर्म्मादिकथनम् । ३यः अशौचव्यवस्था आत्महननादिदोषाः । ४र्थः प्रायश्चित्तमतान्त्येष्टिक्रियाकुशपुत्तलिकादिकथनम् । ५मः प्राणिदष्टप्रायश्चित्तव्यवस्था । ६ष्ठः प्राणिवधप्रायश्चित्तकथनम् । ७मः द्रव्यशुद्ध्यादि । ८मः गोवधादिप्रायश्चित्तम् । ९मः गोवधाप्रवादादि । १०मः अगम्यागमनादिप्रायश्चित्तम् । ११शः अमेध्यभक्षणादि प्रायश्चित्तम् । १२शः प्रायश्चित्ताङ्गस्नानभेदादि ॥ * ॥

अयं खलु मत्स्यगन्धायां सत्यवत्यां वेदव्यासमुत्पादितवान् । एतद्विवरणमुक्तं यथा देवीभागवते । २ स्कन्धे । २ अध्याये द्रष्टव्यम् ॥

पराश्, आश्नाति हिनस्तीति । "अश शि हिंसे + अच् ।" नागभेदः । यथा, महाभारते । १ । ५७ । १८ । "वराहको वीरणकः सुचित्रश्चित्रवेगिकः । पराशरस्तरुणको मणिस्कन्धस्तथारुणिः ॥")

पराशरी, [न्] पुं, पराशरेण प्रोक्तं भिक्षुसूत्रं पाराशर्यं तद्विद्यतेऽस्याध्ययनायेति णः इन् च । पराशरीति ह्रस्वादिश्च । इत्यमरटीकायां भरतः ॥ पाराशरी । चतुर्थाश्रमी ॥

पराश्रया, स्त्री, (पर आश्रयो यस्याः ।) वृक्षोपरिजातलताविशेषः । परगाछा इति भाषा । तत्पर्य्यायः । वन्दा २ वृक्षादनी ३ वृक्षरुहा ४ जीवन्तिका ५ वशिनी ६ पुत्त्रिणी ७ वन्दा ८ परपुष्टा ९ । इति शब्दचन्द्रिका ॥ (अन्याश्रिते, त्रि ॥)

परासनं, क्ली, (परा+अस्+भावे ल्युट् ।) मारणम् । वधः । इत्यमरः । २ । ८ । ११३ ॥

परासुः, त्रि, (परागताः प्रस्थिता असवः प्राणा यस्य ।) मृतः । इत्यमरः । २ । ८ । ११७ ॥ (यथा, रघौ । ९ । ७८ ।

"तौ दम्पती बहु विलप्य शिशोः प्रहर्त्ता
शल्यं निखातमुदहारयतामुरस्तः ।
सोऽभूत् परासुरथ भूमिपतिं शशाप
हस्तार्पितैर्नयनवारिभिरेव वृद्धः ॥"

परासुपरीक्षा वैद्यके यथा,—

"तस्य चेत् परिमृश्यमानं पृथक्त्वेन पादजङ्घोरुस्फिगुदरपार्श्व-पृष्ठेषिका-पाणिग्रीवा-ताल्वोष्ठ-ललाटं स्विन्नं शीतं प्रस्तब्धं दारुणं वीतमांसशोणितं वा स्यात् । परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् । तस्य चेत् परिमृश्यमानानि पृथक्त्वेन गुल्फजानुवङ्क्षण-गुदवृषण-मेढ्रनाभ्यंशस्तनमणिकहनुपर्शुका नासिका कर्णाक्षिभ्रूशङ्खादीनि स्रस्तानि व्यस्तानि च्युतानि स्थानेभ्यः स्युः परासुरयं पुरुषो न चिरात् कालं करिष्यतीति विद्यात् ।"

"तस्य चेदुच्छ्वासोऽतिदीर्घोऽतिह्रस्वो वा स्यात् परासुरिति विद्यात् । तस्य चेत्कर्णौ परिमृश्यमानेन न स्पन्देयातां परासुरिति विद्यात् । तस्य चेद्दन्ताः प्रतिकीर्णाः श्वेता जातशर्कराः स्युः परासुरिति विद्यात् । तस्य चेत् पक्ष्माणि जटाबद्धानि स्युः परासुरिति विद्यात् । तस्य चेच्चक्षुषी प्रकृतिहीने विकृतियुक्ते व्युत्पिण्डिते अतिप्रविष्टे अतिजिह्मे अतिविषमे अतिप्रस्रुते अतिविमुक्तबन्धने सततोन्मिषिते सततनिमिषिते निमेषोन्मेषातिप्रवृत्ते विभ्रान्तदृष्टिके विपरीतदृष्टिके हीनदृष्टिके व्यस्तदृष्टिके नकुलान्धे कपोतान्धे अङ्गारवर्णे कृष्णनीलपीतश्यावताम्रहरितहारिद्रशुक्लवैकारिकाणां वर्णानामन्यतमेनाभिसंप्लुते वा स्यातां परासुरिति विद्यात् । तथास्य केशलोमान्यायच्छेत् । तस्य चेत् केशलोमान्यायम्यमानानि प्रलुच्येरन् नचेत् वेदयत् परासुरिति विद्यात् ।

तस्य चेदुदरे शिराः प्रदृश्येरन् । श्यावताम्रनील-हारिद्रशुक्ला वा स्युः परासुरिति विद्यात् । तस्य चेन्नखा वीतमांसशोणिताः पक्वजाम्बववर्णाः स्युः परासुरिति विद्यात् ।

अथास्याङ्गुलीरायच्छेत्तस्य चेदङ्गुलयः आयम्यमाना नचेत् स्फुटेयुः परासुरिति विद्यात् ॥"

इति चरकेन्द्रियस्थाने चतुर्थेऽध्याय उक्तम् ॥

"वाताष्ठीला तु हृदये यस्योर्द्ध्वमनुयायिनी ।
रुजान्नविद्वेषकरी स परासुरसंशयम् ॥"

इति सुश्रुते सूत्रस्थाने एकत्रिंशत्तमेऽध्याये ॥)

परासुता, स्त्री, (परासोर्मृतस्य भावः । परासु+तल् स्त्रियां टाप् ।) मृतत्वम् । निद्रापरवशता । इति पुराणम् ॥

परास्कन्दी, [न्] पुं, (परान् आस्कन्दितुं शीलमस्य । आ+स्कन्द+णिनिः ।) चौरः । इत्यमरः । २ । १० । २५ ॥

परास्तं, त्रि (परास्यते स्म । परा+अस्+क्तः ।) निरस्तम् । पराजितम् । यथा,—

"ह्रीर्गिरास्तु वरमस्तु पुनर्म्मा-
स्वीकृतैव परवागपरास्ता ॥"
इति नैषधे ५ सर्गः ॥

पराहः, पुं, (परमुत्तरवर्त्ति अहः । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) परदिनम् । यथा । पूर्व्वाह्णे तद्विघ्नेऽपि पराहे त्रिसन्ध्याव्यापित्वे पराह एव । इति सावित्रीव्रते तिथितत्त्वम् ॥

पराह्णः, पुं, (परश्च तदहश्चेति कर्म्मधारयः । "अह्नोऽह्न एतेभ्यः ।" ५ । ४ । ८८ । इति अह्नादेशः । ततः नस्य णः ।) अपराह्णः । विकालः । (केषाञ्चिन्मते अयं पराह्णोऽपि ॥)

परि, व्य, सर्व्वतोभावः । वर्ज्जनम् । व्याधिः । शेषः । इत्थम्भूतः । आख्यानम् । भागः । वीप्सा । आलिङ्गनम् । लक्षणम् । दोषाख्यानम् । निरसनम् । पूजा । व्याप्तिः । भूषणम् । इति मेदिनी ॥ उपरमः । शोकः । इति हेमचन्द्रः ॥ सन्तोषभाषणम् । इति शब्दरत्नावली ॥ उपसर्गविशेषः । अस्यार्थः । सर्व्वतोभावः । अतिशयः । वीप्सा । इत्थम्भावः । चिह्नम् । भागः । त्यागः । नियमः । इति मुग्धबोधटीकायां दुर्गादासः ॥

परिकथा, स्त्री, (परितः कथा ।) वाङ्मयभेदः । यथा,

"अथ वाङ्मयभेदाः स्युः खण्डकथा कथा ।
आख्यायिका परिकथा कलापकविशेषकौ ॥"
इति त्रिकाण्डशेषः ॥

परिकम्पः, पुं, (परितः कम्पो यस्मात् ।) भयम् । कम्पः । इति मेदिनी ॥

परिकरः, पुं, (परिकीर्य्यते इति । कॄ विक्षेपे + "ऋदोरप् ।" ३ । ३ । ५७ । इति अप् । यद्वा परिक्रियतेऽनेनेति पुंसीति घः ।) पर्य्यङ्कः । परिवारः । इत्यमरः । ३ । ३ । १६५ ॥ समारम्भः । वृन्दः । इति शब्दरत्नावली ॥ प्रगाढगात्रिकाबन्धः । (यथा, मार्कण्डेये । १६ । २५ ।

"गाढं परिकरं बद्धा शुल्कमादाय चाधिकम् ।
स्कन्धे भर्त्तारमादाय जगाम मृदुगामिनी ॥")

विवेकः । इति विश्वः । सहकारी । यथा,—